# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50917** **Course Code : AHSNS-504-DSE-2**

Course Title: Veda

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु *पञ्चप्रश्नाः* लघुतया च समाधेयाः। 2×5=10

(a) किं नाम सत्यम्? ऋतशब्देन किं ज्ञायते?

(b) 'शीक्षां व्याख्यास्यामः' इत्यत्र के तावत् शिक्षणीयाः विषयाः?

(c) महासंहितापदेन के विषयाः विविच्यन्ते?

(d) 'ब्रह्मणः कोशोऽसि मेधया पिहितः' इत्यस्य श्रुतिवाक्यस्य अर्थं लिखत।

(e) पराशब्देन किं ज्ञायते? अपराशब्दस्य च कोऽर्थः?

(f) ब्रह्मणः उत्पद्यमानं विश्वं केन क्रमेणोत्पद्यते?

(g) 'अप्राणो ह्यमनाः शुभ्रः' इत्यत्र' 'अप्राणः' इति पदेन 'अमनाः' इति पदेन च किं बुध्यते?

(h) 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते' इति श्रुतिवाक्यस्य अर्थं लिखत।

**2.** अधोलिखितेषु मन्त्रेषु यथेच्छं *द्वयं* व्याख्येयम्। 5×2=10

(a) ओमिति ब्रह्म। ओमितीदं सर्व्वम्।

(b) वेदमनूच्याचार्य्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर।

(c) स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।

**3.** अधोलिखितेषु श्रुतिवाक्येषु यथेच्छं *द्वयं* व्याख्येयम्। 5×2=10

(a) यः सर्व्वज्ञः सर्व्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते।।

(b) अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितम्मन्यमानाः
जङ् घन्यमानाः परियन्ति मूढ़ा
अन्धेनैव नीयमाना यथान्धाः।।

(c) भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे।।

**4.** अधस्तात् कस्य*चिदेकस्य* प्रश्नस्योत्तरं विधेयम्। 10×1=10

(a) तैत्तिरीयोपनिषदि अनुशासनविषये यद्यत् प्रतिपादितं तत् सर्वं वैशद्येन विवृणुत।

(b) 'ऋतञ्च स्वाध्यायप्रवचने च' इत्यादिभिः श्रुतिवाक्यैः कर्मणां पुरुषार्थं प्रति साधनत्वं यथा प्रदर्शितं तथा व्याख्यायताम्।

(c) मुण्डकोपनिषदि ब्रह्मतत्त्वं यथा प्रतिपादितं तथा समासेन लिखत।

# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50917** **Course Code : AHSNS-504-DSE-2**

Course Title: Kāvya

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** यथेच्छं कस्य*चिदेकस्य* प्रश्नस्योत्तरं दीयताम्। 10×1=10

(a) श्रीरामकृष्णेन सह श्रीनरेन्द्रस्य प्रथमः साक्षात्कारः वर्ण्यताम्।

(b) ईश्वरस्य अस्तित्वविषये श्रीनरेन्द्रं प्रति श्रीरामकृष्णस्य उपदेशः वर्ण्यताम्।

(c) वक्रेश्वरस्य चरित्रं वर्ण्यताम्।

**2.** *द्वयोः* सप्रसङ्गव्याख्या कार्य्या। 5×2=10

(a) दीपाद्देदीप्यते दीपो नियमोऽयं सनातनः।
दीपपरम्पराज्वाला नितरां विस्मयावहा।।

(b) सर्वत्रासि जले स्थले त्वमाद्यमूले रे मातः।
असि सर्वघटेऽर्थपुटे साकाराऽथवा निराकारा।।

(c) मायापरिवृतो जनो नारिकेल-सदृशः।

(d) कन्या कामयते रूपं माता वित्तं पिता गुणम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः।।

**3.** *द्वयोः* सप्रसङ्गव्याख्या कार्य्या। 5×2=10

(a) प्रातरारभ्य कष्टेन कृतभिक्षाटनस्य मे।
उपवासो ललाटेऽस्ति दुरन्ता हि विधेर्लिपिः।।

(b) चलद्दन्तस्य मे पत्रचर्वणे नास्ति योग्यता।
वधिरस्य यथा गीतश्रवणे न प्रवर्त्तना।।

(c) अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।
समानधनगर्वेण स्पर्धमानो हि दुःसहः।।

**4.** यथेच्छं *पञ्चानां* प्रश्नानामुत्तराणि संस्कृतभाषया देवनागरलिपिमाश्रित्य कुरुत। 2×5=10

(a) 'भारत-विवेकम्' इति नाटकस्य 'नान्दीं' लिखत।

(b) 'भारत-विवेकम्' इति कीदृशः ग्रन्थः? अस्य रचयिता कः?

(c) रामकृष्णः कः आसीत्? तस्य आविर्भावः कुत्र अभवत्?

(d) 'भारत-विवेकम्' इति नाटके कति दृश्यानि सन्ति? प्रथमदृश्यस्य नाम किम्?

(e) 'अहो! निष्करूणो बालको मे शिवात्मकः। सत्यमकरुणस्तवमसि। कस्येऽयम् उक्तिः? अस्याः तात्पर्यं किम्?

(f) दरिद्रदुर्दैवम् इति प्रहसनस्य नायकः कः? तस्य जीविका कासीत्?

(g) 'नरेन्द्र'– शब्दस्य कोऽर्थः? कौ च तस्य पितरौ?

(h) कदा कुत्र च श्रीरामकृष्णेन सह स्वामिविवेकानन्दस्य साक्षात्कारः अभवत्?

# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50917** **Course Code : AHSNS-504-DSE-2**

Course Title: Nyāya

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** *पञ्च* प्रश्नाः समाधेयाः 2×5=10

(a) 'सप्तपदार्थी' इति ग्रन्थस्य मङ्गलश्लोकः लिख्यताम्।

(b) 'सप्तपदार्थी' इति ग्रन्थे कति पदार्थाः स्वीकृताः? के च ते?

(c) 'सप्तपदार्थी' इति ग्रन्थे कति द्रव्याणि स्वीकृतानि? कानि च तानि?

(d) विशेषस्य लक्षणं 'सप्तपदार्थी' इति ग्रन्थानुसारं लिख्यताम्।

(e) अनित्या पृथिवी कतिविधा? भेदानां नामोल्लेखः करणीयः।

(f) कालभेदाः समुल्लेखनीयाः?

(g) आत्मनः भदौ कौ?

(h) अनुमितिः कतिविधा?

**2.** *चत्वारः* प्रश्नाः समाधेयाः। 5×4=20

(a) अन्धकारस्य अतिरिक्तद्रव्यत्वमस्ति न वेति विचार्यताम्।

(b) मनसः स्वरूपं 'सप्तपदार्थी' इति ग्रन्थमाश्रित्य प्रतिपादनीयम्।

(c) 'आत्मनः भोगकारणं विषयः'– इत्यंशस्य व्याख्या करणीया।

(d) स्मृतेः लक्षणं स्वरूपं च 'सप्तपदार्थी' इति ग्रन्थमाश्रित्य प्रतिपादनीयम्।

(e) 'अनिष्टव्यापकप्रसञ्जनं तर्कः' इति अंशस्य व्याख्या कार्या।

(f) सप्तद्वीपाधरा यावद् यावद् सप्त धराधराः।
तावत् सप्तपदार्थीयमस्तु वस्तुप्रकाशिनी।।
– अयं श्लोकः व्याख्येयः।

(g) कारणत्रयम् आश्रित्य स्वपाठ्यानुसारं लघुनिबन्धो लेख्यः।

**3.** *एकः* प्रश्नः समाधेयः। 10×1=10

(a) सप्तपदार्थी इति ग्रन्थमाश्रित्य अभावस्य स्वरूपं तथा अभावस्य भेदाः निरूपणीयाः।

(b) अनुमानस्य स्वरूपं सप्तपदार्थ्यनुसारं प्रतिपादनीयम्।

(c) प्रमायाः अप्रमायाश्च स्वरूपं 'सप्तपदार्थी' समाश्रित्य प्रतिपादनीयम्।

## B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50917** **Course Code : AHSNS-504-DSE-2**

Course Title: Vyākaraṇa

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** केचन *पञ्च*प्रश्नाः समाधेयाः। 2×5=10

(a) प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयं किम्?

(b) सम्बुद्धिसंज्ञाविधायकं सूत्रं विलिख्य सूत्रस्यार्थं लिखत।

(c) अङ्गसंज्ञाविधायकं सूत्रमर्थसहितं लिखत।

(d) स्वादयः कति? के च ते।

(e) सर्वनामसंज्ञाविधायकं सूत्रमर्थसहितं लिखत।

(f) घि-संज्ञाविधायकं सूत्रं सोदाहरणं प्रतिपाद्यताम्।

(g) का उपधा?

**2.** यथेच्छं *पदचतुष्टयं* ससूत्रं साधयत। 5×4=20

राम:, रामेण, सर्वस्मै, हरी, हरये, त्रयाणाम्, रामम्

**3.** कस्य*चिदेकस्य* सूत्रस्य व्याख्या करणीया। 10×1=10

(a) 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति कृत्तद्धितसमासाश्च' इति च सूत्रद्वयं व्याख्यायताम्।

(b) 'सरूपाणामेकशेष एकविभक्तौ' इति अट्कुप्वाङ्नुम्व्यवायेऽपि इति च सूत्रद्वयं व्याख्यायताम्।

(c) 'आदेशप्रत्यययोः' इति सर्वादीनि सर्वनामानि' इति च सूत्रद्वयं व्याख्यायताम्।

---